
हिमालयकृत शिवस्तोत्रं - ब्रह्मवैवर्तेकृष्णजन्मखण्डे अष्टत्रिंशोध्याये

himālayakṛta śivastotraṃ - brahmavaivartekṛṣṇajanmakhaṇḍe aṣṭatriṃśodhyāye



Link in Description

एतान्पुरोगमान्नत्वा प्रणनाम शिवं गिरिः ।
मूर्ध्ना निपत्य भूमौ स दण्डवत्संपुटाञ्जलिः ।।

etānpurogamānnatvā praṇanāma śivaṃ giriḥ .
mūrdhnā nipatya bhūmau sa daṇḍavatsaṃpuṭāñjaliḥ ..

Check Link in Description

अथो अनल्पया भक्त्या धृत्वा तच्चरणाम्बुजम् ।
ननाम चाश्रुनेत्रः स पुलकाञ्चितविग्रहः ।।

atho analpayā bhaktyā dhṛtvā taccaraṇāmbujam .
nanāma cāśrunetraḥ sa pulakāñcitavigrahaḥ ..

Check Link in Description

धर्मदत्तेन स्तोत्रेण तुष्टाव परमेश्वरम् ।
तुष्टे ब्राह्मे दिनेऽतीते पुष्करे सूर्यपर्वणि ।।

dharmadattena stotreṇa tuṣṭāva parameśvaram .
tuṣṭe brāhme dine'tīte puṣkare sūryaparvaṇi ..

Check Link in Description

हिमालय उवाच ।
त्वं ब्रह्मा सृष्टिकर्ता च त्वं विष्णुः परिपालकः ।।
त्वं शिवः शिवदोऽनन्तः सर्वसंहारकारकः ।।

himālaya uvāca .
tvaṃ brahmā sṛṣṭikartā ca tvaṃ viṣṇuḥ paripālakaḥ ..
tvaṃ śivaḥ śivado'nantaḥ sarvasaṃhārakārakaḥ ..

Check Link in Description

त्वमीश्वरो गुणातीतो ज्योतीरूपः सनातनः ।
प्रकृतः प्रकृतीशश्च प्राकृतः प्रकृतेः परः ।।

tvamīśvaro guṇātīto jyotīrūpaḥ sanātanaḥ .
prakṛtaḥ prakṛtīśaśca prākṛtaḥ prakṛteḥ paraḥ ..

Check Link in Description

नानारूपविधाता त्वं भक्तानां ध्यानहेतवे ।
येषु रूपेषु यत्प्रीतिस्तत्तद्रूपं बिभर्षि च ।।

nānārūpavidhātā tvaṃ bhaktānāṃ dhyānahetave .
yeṣu rūpeṣu yatprītistattadrūpaṃ bibharṣi ca ..

Check Link in Description

सूर्यस्त्वं सृष्टिजनक आधारः सर्वतेजसाम् ।।
सोमस्त्वं सस्यपाता च सततं शीतरश्मिना।

sūryastvaṃ sṛṣṭijanaka ādhāraḥ sarvatejasām ..
somastvaṃ sasyapātā ca satataṃ śītaraśminā.

Check Link in Description

वायुस्त्वं वरुणस्त्वं च त्वमग्निः सर्वदाहकः ।।
इन्द्रस्त्वं देवराजश्च कालो मृत्युर्यमस्तथा ।।

vāyustvaṃ varuṇastvaṃ ca tvamagniḥ sarvadāhakaḥ ..
indrastvaṃ devarājaśca kālo mṛtyuryamastathā ..

Check Link in Description

मृत्युञ्जयो मृत्युमृत्युः कालकालो यमान्तकः ।
वेदस्त्वं वेदकर्ता च वेदवेदाङ्गपारगः ।।

mṛtyuñjayo mṛtyumṛtyuḥ kālakālo yamāntakaḥ .
vedastvaṃ vedakartā ca vedavedāṅgapāragaḥ ..

Check Link in Description

विदुषां जनकस्त्वं च विद्वांश्च विदुषां गुरुः ।
मन्त्रस्त्वं हि जपस्त्वं हि तपस्त्वं तत्फलप्रदः ।।

viduṣāṃ janakastvaṃ ca vidvāṃśca viduṣāṃ guruḥ .
mantrastvaṃ hi japastvaṃ hi tapastvaṃ tatphalapradaḥ ..

Check Link in Description

वाक् त्वं वागधिदेवी त्वं तत्कर्ता तद्गुरुः स्वयम् ।
अहो सरस्वतीबीजं कस्त्वां स्तोतुमिहेश्वरः ।।

vāk tvaṃ vāgadhidevī tvaṃ tatkartā tadguruḥ svayam .
aho sarasvatībījaṃ kastvāṃ stotumiheśvaraḥ ..

Check Link in Description

इत्येवमुक्त्वा शैलेन्द्रस्तस्थौ धृत्वा पदाम्बुजम् ।
तत्रोवास तमाबोध्य चावरुह्य वृषाच्छिवः ।।

ityevamuktvā śailendrastasthau dhṛtvā padāmbujam .
tatrovāsa tamābodhya cāvaruhya vṛṣācchivaḥ ..

Check Link in Description

स्तोत्रमेतन्महापुण्यं त्रिसन्ध्यं यः पठेन्नरः ।
मुच्यते सर्वपापेभ्यो भयेभ्यश्च भवार्णवे ।।

stotrametanmahāpuṇyaṃ trisandhyaṃ yaḥ paṭhennaraḥ .
mucyate sarvapāpebhyo bhayebhyaśca bhavārṇave ..

Check Link in Description

अपुत्रो लभते पुत्रं मासमेकं पठेद्यदि ।
भार्याहीनो लभेद्भार्यां सुशीलां सुमनोहराम्।।

aputro labhate putraṃ māsamekaṃ paṭhedyadi .
bhāryāhīno labhedbhāryāṃ suśīlāṃ sumanoharām..

Check Link in Description

चिरकालगतं वस्तु लभते सहसा ध्रुवम् ।
राज्यभ्रष्टो लभेद्राज्यं शंकरस्य प्रसादतः ।।

cirakālagataṃ vastu labhate sahasā dhruvam .
rājyabhraṣṭo labhedrājyaṃ śaṃkarasya prasādataḥ ..

Check Link in Description

कारागारे श्मशाने च शत्रुग्रस्तेऽतिसंकटे।
गभीरेऽतिजलाकीर्णे भग्नपोते विषादने ।।

kārāgāre śmaśāne ca śatrugraste'tisaṃkaṭe.
gabhīre'tijalākīrṇe bhagnapote viṣādane ..

Check Link in Description

रणमध्ये महाभीते हिंस्रजन्तुसमन्विते ।
सर्वतो मुच्यते स्तुत्वा शंकरस्य प्रसादतः ।।

raṇamadhye mahābhīte hiṃsrajantusamanvite .
sarvato mucyate stutvā śaṃkarasya prasādataḥ ..

Check Link in Description